# प्रार्थना । (केवलं कण्ठस्थीकरणार्थम्)



**करदर्शनम्** – कराग्रे वसते लक्ष्मी:
करमध्ये सरस्वती ।
करमूले तु गोविन्द:
प्रभाते करदर्शनम् ।।





**क्षमाप्रार्थना** – समुद्रवसने देवि
पर्वतावलिभूषिते ।
विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे ।।



**सूर्यनमस्कार:**–ध्येय: सदा सवितृमण्डलमध्यवर्ती
नारायण: सरसिजासनसन्निविष्ट: ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्र: ।।



**भोजनमन्त्र:**– सततमशनकाले मातृभूमिं स्मरेयम्
जय जय जननि त्वं मुक्तकण्ठं वदेयम् ।
हितदसुखदमन्नं प्रत्यहं भक्षयेयम्
भवतु बलसमृद्धं राष्ट्रभक्त्यै शरीरम् ।।



**दीपस्तुति:** – दीपज्योति: परब्रह्म दीपज्योतिर्जनार्दन: ।
दीपो हरति पापानि सन्ध्यादीप नमोऽस्तुते ।।

**शान्तिमन्त्र:** –ॐ पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

# चित्रपदकोषः ।

## उपयुक्तवस्तूनि ।


पिहितपत्रम्


योजिनी


सन्दंशः


सञ्चिका


मृदुमुद्रा



मूल्याङ्कः


रन्ध्रिका


सान्द्रमुद्रिका


संश्लेषपट्टिका


विद्युत्कोषः


स्मृतिशलाका


तन्त्रीः


दृश्यफलकम्


अक्षरफलकम्


पाथेयपात्रम्


वस्त्रसूचिः

## वस्त्राणि ।


ऊरुकम्


अर्धोरुकम्


युतकम्


पादस्यूतः



धौतवस्त्रम्



शाटिका



राङ्कवम्



स्वेदकः

## खाद्यपदार्थाः ।



रोटिका



शाकम्



सूपः



अवलेहः



पर्पटम्



ओदनम्



पायसम्



कुण्डलिका

## रुचयः ।




आम्ला




कटुः




तिक्तम्




कषायम्




मधुरा




लवणम्

# क्रियाः ।


स्थगयति


पिदधाति


उद्घाटयति


निमीलयति


ज्वालयति


निर्वापयति


ददाति/यच्छति


गृह्णाति


माति


अन्विष्यति


परीक्षते


चिनोति


मर्दयति


वेल्लयति


भर्जयति


परिवेषयति



सङ्कलयति



व्यवकलयति



गुणयति



भाजयति



पञ्चवादनम्
०५.००



पञ्चाधिक–पञ्चवादनम्
०५.०५



दशाधिक–पञ्चवादनम्
०५.१०



सपाद–पञ्चवादनम्
०५.१५



विंशत्यधिक–पञ्चवादनम्
०५.२०



पञ्चविंशत्यधिक–पञ्चवादनम्
०५.२५



सार्ध–पञ्चवादनम्
०५.३०



पञ्चत्रिंशदधिक–पञ्चवादनम्
०५.३५



चत्वारिंशदधिक–पञ्चवादनम्
०५.४०



पादोन–षड्वादनम्
०५.४५



दशोन–षड्वादनम्
०५.५०



पञ्चोन–षड्वादनम्
०५.५५

✻ पुनःस्मारणम् – सङ्ख्याः अक्षरैः/ अङ्कैः लिखत । (एकतः शतं पर्यन्तम् ।)

| अङ्काः | अक्षराणि |
|---|---|
| १५ | |
| २३ | |
| ८० | |
| ६४ | |
| – | षट्त्रिंशत् |
| ८७ | |
| ४२ | |
| ५८ | |
| – | नवसप्तति: |

| | |
|---|---|
| – | सप्तनवति: |
| ९१ | |
| १८ | |
| ३२ | |
| ८८ | |
| ४ | |
| ९९ | |
| ६१ | |
| – | पञ्चाशत् |
| १०० | |

१.




२.




३.




४.




५.




६.




वासर–तालिकां पूरयत । (अद्य, श्वः . . . . .)



# प्रथमः पाठः ।  आद्यकृषकः पृथुवैन्यः ।

ऋग्वेदात् एषा कथा उद्धृता (ऋ.१०.९३.१४) । वेनभूपतेः पुत्रः वैन्यः एव पृथुवैन्यः इति नाम्ना ज्ञातः । सः प्रजाहितदक्षः आदर्शः सम्राट् इति स्मृतः। भारतदेशे पृथुना एव कृषिकार्यं प्रारब्धं, संशोधितं, विकासं प्रति नीतं च। स एव कृषिविद्यायाः जनकः इति मतः। अत एव सः प्रथमः कृषकः। धरित्र्याः 'पृथिवी' इति नामाभिधानं पृथोः कार्यस्य स्मारकम्' इति मन्यते बुधैः।






भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् । प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः ! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''



तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण

अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः। धान्यलाभेन सर्वे प्रजाजनाः सन्तुष्टाः च अभवन्। एषः कल्याणकारी नृपः पृथिव्यां प्रशासने अग्रणीः जनसेवाव्रती च अभवत्।

**पृथुवैन्यस्य आदर्शभूतानि कार्याणि ।**







## १. पूर्णवाक्येन उत्तरं लिखत।

अ) चारणाः किमर्थम् उत्सुकाः ?

आ) भ्रमणसमये पृथुराजेन किं दृष्टम् ?

इ) वसुन्धरायाः उदरे किं वर्तते ?

ई) स्त्रीरूपं धृत्वा पृथुनृपस्य पुरतः का प्रकटिता अभवत् ?

उ) पृथुवैन्यः कृषिकार्यार्थं जलस्य व्यवस्थापनं कथम् अकरोत् ?

## २. जालरेखाचित्रं पूरयत ।

अ)




आ)




इ)




## ३. पाठ्यांशं पठित्वा प्रवाहिजालं पूरयत ।



### ४. माध्यमभाषया उत्तरत ।

अ) भूमाता पृथुवैन्यं किम् उपादिशत् ?

आ) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

### ५. अमरकोषात् योग्यं समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

अ) राजा चिन्ताकुलः जातः । आ) भूमिः स्त्रीरूपं धृत्वा प्रकटिता ।

### ६. मेलनं कुरुत ।

| विशेषणम् | कृशाः | उर्वरा | आनन्दिताः | दुःशासकः | प्रजाहितदक्षः |
|---|---|---|---|---|---|
| विशेष्यम् | पृथुः | वेनः | प्रजाः | भूमिः | प्रजाजनाः |

**७. समानार्थकशब्दं लिखत ।** वृक्षः, भूमिः, राजा, धनुः, नदी ।

**८. विरुद्धार्थकशब्दं लिखत ।** स्तुतिः , सद्गुणाः, प्रसन्नाः, अशक्ताः, पुरतः, कृशाः ।

### ९. कः कं वदति ?

अ) तिष्ठन्तु चारणाः । आ) तत्प्राप्तुं यतस्व । इ) तव पिता दुःशासकः । ई) अतः धनुः त्यज ।

**१०. सन्धिविग्रहं कुरुत ।** अ) उदरं एव आ) पशुवज्जीवन्ति इ) अशक्ताश्च ई) पुरोहितोऽवदत् ।

---

## प्रवहतात् संस्कृत-मन्दाकिनी

शतशतकोटिशरत्पर्यन्तम् ।
प्रवहतात् संस्कृत-मन्दाकिनी ।।धृ.।।
अज्ञाता यस्या गङ्गोत्री इतिहासस्य न यत्रास्ति गतिः ।
परिणतं फलम् अनादिः श्रुतिः यत्प्रसवः सा भारतवाणी ।।१।।
सिन्धुशुतुद्रीसरस्वतीनां तटे ऋषीणां ध्यानपराणाम् ।
होमधूमपावितलोकानाम् अत्रिभृगूणां छन्दोवाणी ।।२।।
'कस्त्वं कोऽहं' प्रश्नपराणाम् आत्मतत्त्वदर्शनोत्सुकानाम् ।
याज्ञवल्क्यमुनिजनकादीनां तत्त्वमसीति ब्रह्मवादिनी ।।३।।
वाल्मीकिमुनिव्यासविरचिता रामकृष्णयोः पावनगाथा ।
अखण्डदीपो भगवद्गीता कर्मयोगसन्देशदायिनी ।।४।।
मेघदूतशाकुन्तलरघुभिः उत्तररामकिरातकुमारैः ।
कालिदासभवभूतिप्रमुखैः कृतिविभूषणा मधुरभाषिणी ।।५।।
पाणिनिसदृशैः स्तोत्रगायकैः भोजमम्मटादिभिर्भूषकैः ।
शङ्करादिभिस्तत्त्वचिन्तकैः दत्तवन्दना वाक्सम्राज्ञी ।।६।।
इयमस्माकं धर्मभारती राष्ट्रैक्यस्य च महती स्फूर्तिः ।
विना संस्कृतं नैव संस्कृतिः इहामुत्रकल्याणकारिणी ।।७।।
पुष्टिं तुष्टिं समावहन्ती जीवितपुष्पं विकासयन्ती ।
विश्वमङ्गलं फलं फलन्ती कोटिकोटिशरत्पर्यन्तम् प्रवहतात् संस्कृतमन्दाकिनी ।।८।।

**- डॉ. गजानन बाळकृष्ण पळसुले**

**पठत-बोधत**

आधुनिकः महाकविः डॉ. गजानन बाळकृष्ण पळसुले महाभागः महाराष्ट्रे सातारा नगरे जातः । व्याकरणशास्त्रविषये तथा भाषाशास्त्रविषये प्रभूतं संशोधनं लेखनं च कृतं महोदयेन । त्रीणि नाटकानि, द्वे चरिते, 'वैनायकम्' इति प्रेरकं महाकाव्यम् इत्यस्य ग्रन्थसम्पद् । प्रसिद्धानां मराठी - नाट्यकाव्यानां सरसः सरलः च अनुवादः अपि कृतः अनेन ।

नैकैः पुरस्कारैः भूषितः अयं राष्ट्रियपण्डितः राष्ट्रपतिपुरस्कारेणापि सम्मानितः । अस्मै पण्डितश्रेष्ठाय नमः ।

7KHFJH